# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः – २३/४/२०१६ | सन्दर्भग्रन्थः – साहित्यदर्पणे – ८-९-१० परिच्छेदाः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।<br>वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ॥<br>(२) श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः ।<br>गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते ॥<br>(३) ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।<br>समासबहुला गौडी---- ॥ | |
| **प्रश्नः -२** | ग्रन्थोक्तदिशा माधुर्यगुणः सोदाहरणं विवेचनीयः ।<br>अथवा<br>प्रसादगुणः ग्रन्थोक्तदिशा प्रतिपादनीयः । | ०८ |
| **प्रश्नः -३** | **टिप्पणीद्वयं लेख्यम् ।** | ०४ |
| | (१) पाञ्चाली रीतिः<br>(२) वैदर्भीरीतिः<br>(३) गुणलक्षणम्<br>(४) रीतिलक्षणम् | |
| **प्रश्नः - ४** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) कति रीतयः ? नामानि लिखत ।<br>(२) कति गुणाः ? नामानि लिखत ।<br>(३) लाटीरीतेः लक्षणम् किम् ?<br>(४) गुणनिरनपणं कस्मिन्परिच्छेदे ?<br>(५) ओजोगुणव्यञ्जका रचना कीदृशी भवेत् ?<br>(६) कः समाधिः ?<br>(७) मिश्रभावेन का रीतिः ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।<br>उक्तानुक्तनिमित्तत्वाद् द्विधा सा परिकीर्तिता ॥<br>(२) शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमागतः । लाटानुप्रास इत्युक्तः ।<br>(३) श्रोतीं यथैववाशब्दाः इवार्थो वा वतिर्यदि । | |

| | | |
|---|---|---|
| **प्रश्नः -६** | उपमालङ्कारः ग्रन्थोक्तदिशा सप्रकारं विवेचनीयः ।<br>अथवा<br>रूपकालङ्कारस्य लक्षणं विलिख्य तद्भेदान् सोदाहरणं विवेचयत । | ०८ |
| **प्रश्नः -७** | **टिप्पणीद्वयं लिखत ।** | ०४ |
| | (१) उत्प्रेक्षालक्षणम् (२) विशेषोक्तिः (३) अतिशयोक्तिः (४) यमकम् | |
| **प्रश्नः -८** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) अनुप्रासलक्षणम् किम् ?<br>(२) अपह्नुतिलक्षणं किम् ?<br>(३) उत्प्रेक्षालङ्कारस्य कति भेदाः आहत्य ?<br>(४) कः वृत्यनुप्रासः ?<br>(५) अनन्वयस्य लक्षणं किम् ?<br>(६) "सत्यर्थे" इत्यस्य किं प्रयोजनं यमके ?<br>(७) अलङ्कारलक्षणं किम् ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।<br>(२) यद्येत एवालङ्काराः परस्परविमिश्रिताः ।<br>तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा ॥<br>(३) जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।<br>क्रिया क्रिया द्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः ॥<br>विरुद्धमेव बासेन विरोधोऽसौ दशाकृतिः ॥ | |
| **प्रश्नः -१०** | सङ्करसंसृष्टयोः साम्यं वैषम्यं च सोदाहरणं प्रतिपादयत ।<br>अथवा<br>निदर्शनाप्रतिवस्तूपमयोः साम्यं वैषम्यं च सोदाहरणं विवेचयत । | ०८ |
| **प्रश्नः -११** | **एका टिप्पणी लेख्या ।** | ०२ |
| | (१) समासोक्तिः (२) एकावली | |
| **प्रश्नः -१२** | **द्वयोः एकैकवाक्यद्वारा उत्तरलेखनं करणीयम् ।** | ०२ |
| | (१) कारणमालायाः लक्षणं लिखत ।<br>(२) तिलतण्डुलवत् कोऽलङ्कारः ?<br>(३) अर्थान्तरन्यासलक्षणं किम् ? | |

***